# वैयाकरणसिद्धान्तकौमुदी

## हलन्तपुंलिङ्गप्रकरणम् (४)

०२.०८.२०११

# पुनरावर्तनम्

- हकारान्ताः पुंलिङ्गाः
- विश्ववाह् शब्दः
- भसंज्ञायाम् ‘वाह ऊठ्’ इति संप्रसारणम् । ‘एत्येधत्यूठ्सु’ इति वृद्धिः ।
- विश्वौहः, विश्वौहा इत्यादि ।

- अनडुह्-शब्दः
- सर्वनामस्थानेषु ‘चतुरनडुहोरामुदात्तः’ इति आमागमः, सम्बुद्धौ आमं बाधित्वा ‘अम् सम्बुद्धौ’ इति अम् ।
- सौ परे अकारात् परम् ‘सावनडुहः’ इति नुम् ।
- अनड्वान्, अनड्वाहौ, अनड्वाहः ।
- हे अनड्वन् ।
- पदान्ते हकारस्य स्थाने दकारादेशः ‘वसु-स्रंसु-ध्वंसु-अनडुहां दः’ इति ।
- अनडुद्भ्याम्, अनडुद्भिः ।

- य एतन्मर्त्यमुद्दिश्य भगवत्यप्रतिद्रुहि ।
  द्रुह्यत्यज्ञः पृथग्दृष्टिः तत्त्वतो विमुखो भवेत् ॥
(श्रीमद्भागवतम् - ४.२.२१)
- अप्रतिद्रुहि - हकारान्तः पुंलिङ्गः 'अप्रतिद्रुह्' शब्दः, सप्तमीविभक्तिः, एकवचनम् ।
- अनोभिरनडुद्युक्तैस्तमनुज्ञाप्य गोकुलम् (श्रीमद्भागवतम् - १०.५.३२)
- अनडुद्युक्तैः - समासे पदान्तत्वात् 'वसु-स्रंसु...' इति हस्य दः ।

- सोऽयं दुर्मर्षहृदयो ब्रह्मध्रुक् च लोकेऽपकीर्तिं महतीम् अवाप्स्यति । (श्रीमद्भागवतम् - ४.४.३०)
- ब्रह्मध्रुक् - हकारान्तः पुंलिङ्गः ‘ब्रह्मद्रुह्’ शब्दः, प्रथमाविभक्तिः, एकवचनम्
- सुलोपः, घत्वम्, भष्भावः, जश्त्वम्, चर्त्वम् ।
- अनड्वाहं सुव्रतं यो ददाति हलस्य वोढारमनन्तवीर्यम् ।
  धुरन्धरं बलवन्तं युवानंप्राप्नोति लोकान् दश धेनुदस्य ॥
(महाभारतम् - ३.३७.१८४.०.१०)
- अनड्वाहम् - हकारान्तः पुंलिङ्गः ‘अनडुह्’ शब्दः, द्वितीयाविभक्तिः, एकवचनम् ।
- अम्-प्रत्ययः, ‘चतुरनडुहो:..’ इति आमागमः, यण् ।

# रेफान्ताः पुंलिङ्गाः

- रेफान्तः पुंलिङ्गः ‘चतुर्’ शब्दः ।
- नित्यं बहुवचनान्तः ।

- चतुर्  (जस्) अस्
- चतु आ र्  अस्   (‘चतुरनडुहोरामुदात्तः’ - ७.१.९८ - इति आमागमः)
- चत्वार्  अस् (‘इको यणचि’ - ६.१.७७)
- चत्वारर्      (‘ससजुषो रुः’ - ८.२.६६)
- चत्वारः      (‘खरवसानयोर्विसर्जनीयः’ - ८.३.१५)

- चतुर्  (शस्) अस्
- चतुरर्
- चतुरः
- सर्वनामस्थानत्वाभावेन आमागमो न ।

- चतुर्भिः ।
- चतुर्भ्यः ।
- चतुर्भ्यः ।

# ३३८. षट्चतुर्भ्यश्च (७.१.५५)

- पदद्वयम् । षट्चतुर्भ्यः, च ।
- 'ह्रस्वनद्यापो नुट्' (७.१.५४) इत्यतः 'नुट्' इत्यनुवर्तते ।
- षट्-संज्ञकेभ्यः चतुरश्च परस्य आमः नुडागमः स्यात् ।
- णत्वम्, द्वित्वम् ।

- चतुर्  आम्
- चतुर् न् आम्  ('षट्चतुर्भ्यश्च' - ७.१.५५ - इति णत्वम्)
- चतुर्णाम्  ('रषाभ्यां नो णः समानपदे' - ८.४.१ - इति णत्वम्)
- चतुर्ण्णाम्  ('अचो रहाभ्यां द्वे' - ८.४.४६ - इति द्वित्वम्)

- चतुर्  सु
  - ‘खरवसानयोर्विसर्जनीयः’ इति रेफस्य विसर्गे प्राप्ते,

# ३३९. रोः सुपि (८.३.१६)

- पदद्वयम् ।
- 'खरवसानयोर्विसर्जनीयः' (८.३.१५) इत्यतः 'विसर्जनीयः' इति अनुवर्तते
- सप्तमीबहुवचने रोरेव विसर्जनीयः, नान्यरेफस्य ।
- षत्वम् ।
- चतुर्षु ('आदेशप्रत्यययोः' - ८.३.५९ - इति षत्वम्)
- षस्य द्वित्वे प्राप्ते ('अचो रहाभ्याम् द्वे' ),

# ३४०. शरोऽचि (८.४.४९)

- पदद्वयम् । शरः, अचि ।
- 'अचो रहाभ्यां द्वे' (८.४.४६) इत्यतः 'द्वे' इति, 'नादिन्याक्रोशे पुत्रस्य' (८.४.४८) इत्यतः 'न' इति च अनुवर्तते ।
- अचि परे शरः द्वे न स्तः ।

- चतुर्षु ।

# रेफान्तः पुँल्लिङ्गः चतुर्-शब्दः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमाविभक्तिः | | | चत्वारः |
| सम्बोधनप्रथमाविभक्तिः | | | हे चत्वारः |
| द्वितीयाविभक्तिः | | | चतुरः |
| तृतीयाविभक्तिः | | | चतुर्भिः |
| चतुर्थीविभक्तिः | | | चतुर्भ्यः |
| पञ्चमीविभक्तिः | | | चतुर्भ्यः |
| षष्ठीविभक्तिः | | | चतुर्णाम्/चतुण्णार्म् |
| सप्तमीविभक्तिः | | | चतुर्षु |

सर्वनामस्थाने ‘चतुरनडुहोः..’ इति आम

आमि ‘षट्चतुर्भ्यश्च’ इति नुट्, ‘अचो रहाभ्याम्...’ इति द्वित्वम्

- रेफान्तः पुंलिङ्गः ‘प्रियचतुर्’ शब्दः ।
- प्रियाः चत्वारः यस्य सः - इति बहुव्रीहिः । अत्र सर्वाणि वचनानि भवन्ति ।
- सर्वनामस्थानेषु ‘चतुरनडुहोः…’ इति आम् ।
- प्रियचत्वाः, प्रियचत्वारौ, प्रियचत्वारः ।
- हे प्रियचत्वः ।
- ‘अम् सम्बुद्धौ’ इति सम्बुद्धौ आमागमं बाधित्वा अमागमः ।
- गौणत्वे तु नुट् नेष्यते ।
- प्रियचतुराम् ।
- प्राधान्ये तु स्यादेव । परमचतुर्णाम् ।

# रेफान्तः पुँल्लिङ्गः प्रियचतुर्-शब्दः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| | प्रियचत्वाः | प्रियचत्वारौ | प्रियचत्वारः |
| | हे प्रियचत्वः | हे प्रियचत्वारौ | हे प्रियचत्वारः |
| द्वितीयाविभक्तिः | प्रियचत्वारम् | प्रियचत्वारौ | प्रियचतुरः |
| तृतीयाविभक्तिः | प्रियचतुरा | प्रियचतुर्भ्याम् | प्रियचतुर्भिः |
| | प्रियचतुरे | प्रियचतुर्भ्याम् | प्रियचतुर्भ्यः |
| | प्रियचतुरः | प्रियचतुर्भ्याम् | प्रियचतुर्भ्यः |
| | प्रियचतुरः | प्रियचतुरोः | प्रियचतुराम् |
| | प्रियचतुरि | प्रियचतुरोः | प्रियचतुर्षु |

सर्वनामस्थानेषु ‘चतुरनडुहोः..’ इति आम् । सम्बुद्धौ तु अम्

आमि गौणत्वात् ‘षट्चतुर्भ्यश्च’ इति नुट् न

# लकारान्ताः पुंलिङ्गाः

- कमलं कमलां वा आचक्षाणः कमल् ।
- कमल (णिच्) इ ('तत्करोति तदाचष्टे' इति णिच्)
- कमल् इ ('अतो लोपः' इति उपधालोपः)
- कमल् इ (क्विप्) व् ('क्विप् च' इति क्विप्)
- कमल् व् ('णेरनिटि' - इति णिलोपः)
- कमल् ('वेरपृक्तस्य' इति वलोपः)
- लकारान्तः पुंलिङ्गः 'कमल्' शब्दः ।

- कमल्  (सुँ)  स्
- कमल्         (‘हल्ङ्याब्भ्यो…’ - ६.१.६८ - इति सुलोपः)

- कमलौ, कमलः ।

- षत्वम्, कमल्षु ।

# लकारान्तः पुँल्लिङ्गः कमल्-शब्दः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमाविभक्तिः | कमल् | कमलौ | कमलः |
| सम्बोधनप्रथमाविभक्तिः | हे कमल् | हे कमलौ | हे कमलः |
| द्वितीयाविभक्तिः | कमलम् | कमलौ | कमलः |
| तृतीयाविभक्तिः | कमला | कमल्भ्याम् | कमल्भिः |
| | कमले | कमल्भ्याम् | कमल्भ्यः |
| | कमलः | कमल्भ्याम् | कमल्भ्यः |
| | कमलः | कमलोः | कमलाम् |
| | कमलि | कमलोः | कमल्षु |

सुपि इणः
परत्वात् षत्वम् ।

- संक्रन्दनो दुश्च्यवनः तुराषाण्मेघवाहनः (अमरः)
- महर्षयः सप्त पूर्वे चत्वारो मनवस्तथा ।
मद्भावा मानसा जाताः येषां लोक इमाः प्रजाः ॥ (भगवद्गीता - १०.६)
- यथा चतुर्भिः कनकं परीक्ष्यते निघर्षण-च्छेदन-ताप-ताडनैः ।
तथा चतुर्भिः पुरुषः परीक्ष्यते कुलेन शीलेन गुणेन कर्मणा ॥

- धर्मेण चतुरो वर्णान् पालयन् क्लेशमाप्नुहि (श्रीमद्रामायणम् - २.१०६.२१)
- कर्ता कारयिता चैव प्रेरकश्चानुमोदकः ।

सुकृते दुष्कृते चैव चत्वारः समभागिनः ॥

- चतुर्णाम् आश्रमानां हि गार्हस्थ्यं श्रेष्ठमाश्रमम् (श्रीमद्रामायणम् २.१०६.२२)